International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(1): 245-248
© 2024 IJSR
www.anantaajournal.com
Received: 13-12-2023
Accepted: 14-01-2024

**डी. विद्याश्रीः**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

**Corresponding Author:**
**डी. विद्याश्रीः**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

# वेददृशि स्त्रियाः अधिकाराः

**डी. विद्याश्रीः**

## प्रस्तावना

स्त्रीणां वेदाध्ययनविषये समाजे बहवः भ्रान्तयः प्रसृताः सन्ति। केचन मन्यन्ते- स्त्रीणां वेदाध्ययनाधिकारः नास्ति इति। स्त्रीशूद्रौ नाधीयातामिति श्रुतेः इति लोके प्रसिद्धं वाक्यम् अपि एवंविधसन्देहं प्रोत्साहयति। वेदे स्त्रीणां कृते समुचितं स्थानमपि नास्ति इत्यपि मन्यन्ते केचन विद्वांसः।

अत्र सर्वप्रथमं स्त्रीशूद्रौ नाधीयातामिति श्रुतेः इति वाक्ये एव वेदाध्ययनसम्बद्धाधिकारविषयस्य समाधानमुपलभ्यते। अत्र वाक्ये इति शब्दस्य प्रयोगः दृश्यते। अनेन ज्ञायते यत् एतद्वाक्यं वेदस्य नास्ति इति। यतो हि यदि वेदे एव एतद्वाक्यं अभविष्यत् तर्हि स्त्रीशूद्रौ नाधीयाताम् इत्येव वाक्यं तत्र दृश्येत। इति श्रुतेः इति प्रयोगः न भवेत्। अत्र इति श्रुतेः इति कथनेन एव एतद् वाक्यं श्रुतिवाक्यं नास्तीति ज्ञायते।

स्त्रीणां वेदाध्ययनस्य अधिकारः अस्ति इति स्वयं वेदः एव ज्ञापयति-

'ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।
अनड्वान् ब्रह्मचर्येणाश्वो घासं जिगीर्षति' [1]॥

ब्रह्मचर्यं पालयित्वा कन्या युवानं पतिं विन्दते इति अथर्ववेदस्य अस्मिन् मन्त्रे कथ्यते। अत्र ज्ञातव्यविषयः अयं विद्यते यत् ब्रह्म इति शब्दः संस्कृतसाहित्ये वेदस्य वाचकः अस्ति। ब्रह्म जानाति ब्राह्मणः इति वाक्यं संस्कृतसाहित्ये प्रसिद्धमस्ति। अत्र ब्रह्म शब्दः वेदवाचकः एव। ऋग्वेदः स्वयं वदति यत् पतिपत्न्यौ सुरक्षितौ व्यवहारकुशलौ भवेताम्। पत्नी विदुषी, तेजस्विनी उत्तमवक्ता च भवेदिति। यथा-

'अहं केतुरहं मूर्धाऽहमुग्रा विवाचिनी'[2]।

एवंविधवेदवाक्यैः ज्ञायते यत् वेदे स्त्रियाः समानाधिकारः विद्यते। सामाजिकव्यवहारेष्वपि स्त्रियाः सम्यक् अधिकारः वेदेन कृतः। यथा-

'गृहान् गच्छ गृहपत्नी यथासः'।

विवाहानन्तरं स्त्री पतिगृहे गृहस्वामिनी इव अधिकारवती भवति, अतः वेदेन सा गृहपत्नी इति सम्बोधनेन सम्बोधिता। वेदे यत्रापि स्त्रीणाम् उल्लेखः अस्ति तत्र विदुषीणां सुशिक्षितानां स्त्रीणां वर्णनं विद्यते। अत्र ऋग्वेदस्य अथर्ववेदस्य च मन्त्रं पश्यामः-

'चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम्।
द्यौर्भूमिः कोश आसीद् यदयात् सुर्या पतिम्'[3]॥

**यदा सूर्या अर्थात् ब्रह्मचारिणी कन्या विवाहिता भूत्वा पत्युः** गृहं प्रति चलितुम् उपक्रमते तदा तस्याः पिता कीदृशं स्त्रीधनं दत्तवान् इति वर्णनम् अस्मिन् मन्त्रे वर्तते। अत्र उच्यते विचारशीलताम् एव उपधानमिव विधाय स्त्रीधनं दत्तवानिति। वस्तूनां परीक्षणाय अञ्जनमिव विधाय स्त्रीधनं दत्तवानिति। द्युलोकं भूलोकं च धनमिव विधाय स्त्रीधनं दत्तवानिति। अत्र मन्त्रे स्त्रीधनं स्त्रियाः योग्यताः एव गणिताः। अनेन स्त्रियाः सन्माननं विहितम्। श्वशुरालये स्त्री कथंविधाधिकारेण जीवेत् इति विषये ऋग्वेदे उच्यते-

'सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु'[4]॥

**स्त्री पत्युः श्वशुरयोः** च सेवां कुर्वन्ती एव स्वकीयम् उत्तरदायित्वं निर्वहेत्। श्वशुरयोः कृते ननान्दुः कृते च सा सम्राज्ञी अस्ति इति वेदे उक्तम्। अनेन ज्ञायते यत् वेदः स्त्रीणाम् अतीव सन्माननं करोति इति। श्वशुरालयेऽपि सा सम्राज्ञी इव सन्माननं प्राप्नुयादिति वेदः वदति। वेदः स्त्रियाः महत्त्वं प्रदर्शन् वदति-

'जायेदस्तम्'[5] ।

**अस्य मन्त्रांशस्य अर्थः** भवति- स्त्री एव गृहमुच्यते इति। गृहमिति कथनेन स्त्रियाः एव ग्रहणं भवति। गृहे निवसन्तः अन्ये जनाः गृहमिति कथनेन न गृहीताः भवन्ति अपितु वेदानुगुणं गृहमिति कथनेन स्त्री एव गृह्यते। वेदेन स्त्रियाः एवंविधमुन्नतं स्थानं स्वीकृतम्। यज्ञेषु युद्धेषु च स्त्री निजभर्त्रा सह भवति इति वर्णनम् अथर्ववेदे दृश्यते। यथा-

'सहोत्रं स्म पुरा नारी समनं वाव गच्छति।
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः'[6]॥

अनेन मन्त्रेण ज्ञायते यत् यदि स्त्री सामूहिकेषु यज्ञेषु सामूहिकेषु वा युद्धेषु निजभर्त्रा सह भवति चेत् सा तत्सम्बद्धं ज्ञानमपि प्राप्नुयात्। यज्ञसम्बद्धज्ञानं विना सा यज्ञेषु कथं भागं ग्रहीष्यति? युद्धविद्यानां ज्ञानं विना युद्धेषु कथं भागं ग्रहीष्यति? अतः स्त्रीणां यज्ञसम्बद्धं विशिष्टं ज्ञानं पारम्परिकरूपेण अभवत्। अवश्यमेव स्त्रीणां युद्धसम्बद्धं विशिष्टं ज्ञानं पारम्परिकरूपेण आसीत्। वेदेन स्त्रीपुरुषयोः मध्ये कश्चन भेदः न प्रदर्शितः इति ज्ञायते। यथा राजा, न्यायाधीशाः राज्याधिकरिणश्च पुरुषसम्बद्धां शासनव्यवस्थां न्यायव्यवस्थां वा कुर्वन्ति, तथा स्त्रियः अपि योग्यतया स्त्रीसम्बद्धां शासनव्यवस्थां न्यायव्यवस्थां वा कुर्युरिति वेदस्य अभिप्रायः लक्ष्यते-

'प्रजापतिष्ट्वा सादयत्वपां पृष्टे समुद्रस्येमन्।
व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि'[7]॥

**अस्य मन्त्रस्य भावं महर्षिदयानन्दः** एवं वदति- 'राजपुरुषादयः स्वयं यस्मिन् राजकर्मणि प्रवर्तेरन्

तस्मिन् स्वां स्वां स्त्रियं स्थापयेयुः। यः पुरुषः पुरुषाणां न्यायाधिकारे तिष्ठेत्तस्य स्त्री स्त्रीणां न्यायासने स्थिता भवेत्'[8] इति।
अनेन ज्ञायते यत् वेदेषु स्त्रीणां स्थानं क्वचिदपि अल्पं न मतम् इति। यथा पुरुषाणां कर्तव्यानि सन्ति तथैव तत्सममेव स्त्रीणामपि कर्तव्यानि उपदिष्टानि सन्ति। अतः वेदः पुरुषान् स्त्रीः च प्रति समानं पश्यति। पूर्वकाले स्त्रीणामपि उपनयनसंस्कारः भवति स्म। गुरुमुखात् स्त्रियः अपि विधिवत् वेदाध्ययनं कुर्वन्ति स्म। अस्य प्रमाणं निर्णयसिन्धुः इति नामके ग्रन्थे उपलभ्यते-

'पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते।
अध्ययनं च वेदानां भिक्षाचर्यं तथैव च'[9]॥

स्त्रीणामुपनयनसम्बद्धं वेदे अपि प्रमाणमुपलभ्यते। यथा-

'देवा एतस्यामवदन्त पूर्वे सप्त-ऋषयस्तपसे ये निषेदुः।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन्'[10]॥

अत्र मन्त्रे ब्राह्मणस्य भीमा जाया इति कथनेन ब्राह्मणस्य भयंकरी पापनाशिनी जाया उपनीता सती अर्थात् उपनयनसंस्कारेण गुरुं प्राप्नोति इति ज्ञायते। उपनयनसंस्कारमात्रेणैव वेदाध्ययने यज्ञे च अधिकारः उपलभ्यते। ऋग्वेदे यजुर्वेदे च स्त्रियाः आदरसूचकानि बहूनि पदानि विशेषणत्वेन प्रयुक्तानि सन्ति। यथा-

'अषढासि सहमाना सहस्वारातीः सहस्व पृतनायतः।
सहस्रवीर्यासि सा मा जिन्व'[11]॥

अत्र मन्त्रे विद्यमानानां विशेषणपदानां अर्थान् पश्यामः। अषाढा - अजेया। सहमाना - विजयिनी। सहस्रवीर्या - असंख्यपराक्रमयुता। एवमेव ऋग्वेदे अपि स्त्रियाः आदरसूचकानि कानिचन विशेषणपदानि उपलभ्यन्ते। यथा-

'असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी।
आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव'[12]॥

अत्रापि मन्त्रे विद्यमानानां स्त्रीविशेषणपदानां अर्थान् पश्यामः। असपत्ना - शत्रुरहिता। सपत्नघ्नी - शत्रुनाशिनी। जयन्ती - जयं प्राप्नुवन्ती। अभिभूवरी - शत्रूणां पराजयस्य कर्त्री। एतादृशमन्त्राणाम् अध्ययनेन, वेदेन स्त्रीणां कीदृशमुन्नतं स्थानं परिगणितम् इति ज्ञायते। न्यायनिर्णेतृरूपेणापि स्त्रियाः स्थानं भवति इति वेदेन उच्यते-

'निषसाद धृतव्रतो वरुणः पस्त्यास्वा।
साम्राज्याय सुक्रतुः'[13]॥

महर्षिदयानन्दः स्वीययजुर्वेदभाष्ये अस्य मन्त्रस्य अर्थम् एवं वदति-
'यथा सम्राट् साम्राज्यं पालयितुं न्यायासने स्थित्वा पुरुषाणां सत्यं न्यायं कुर्यात्तथा राजपत्नी स्त्रीणां नित्यं न्यायं कुर्यात्। अतः किमागतं यादृशो नीतिविद्याधर्मयुक्तः स्वामी पुरुषाणां न्यायं कुर्यात्तादृश्येव तत्स्त्रिया भवितव्यमिति'[14]।
एवंप्रकारेण वेदेषु स्त्रीपुरुषयोः समानाधिकाराः एव प्रदर्शिताः सन्ति। यज्ञादिष्वपि स्त्री मन्त्रपाठं कुर्यादिति प्रमाणानि उपलभ्यन्ते। यथा- 'इमं मन्त्रं पत्नी पठेत्' इत्यादिवाक्यानि श्रौतसूत्रादिषु लिखितानि सन्ति। यदि कश्चित् मन्त्रः पत्न्या पठनीयः अस्ति चेत् सा मन्त्रस्वरस्यापि ज्ञात्री भवेत् सस्वरं वेदपाठं कर्तुं शक्नुयात्। एतत् सर्वं तदा सम्भवति यदा स्त्रियः अपि वेदाध्ययनं कृतवत्यः भवेयुः। आश्वलायनश्रौतसूत्रेष्वपि पठितं यत्-
'पत्नी वाचयति मेध्यामेवैनं करोति वेदं पत्यै प्रदाय वावयेद्धोताऽध्वर्युर्वा वेदोऽसि वित्तिरसि'[15]।
विना वेदज्ञानं यज्ञेषु पत्नी कथं मन्त्रोच्चारणं कर्तुं शक्नुयात्? इति विचारणीयः। अस्मिन्नेव विषये

तैत्तिरीयब्राह्मणेऽप्युक्तं यत्-
'यत्पत्नी पुरोऽनुवाक्यमनुब्रूयात्'[16]।

पत्न्याः मन्त्रपाठः तद एव सम्भवति यदा सा वेदाध्ययने पारंगता भवेत्। मीमांसाशास्त्रे स्पष्टतया उक्तं यत्- 'ज्ञाते च वाचनं न ह्यविद्वान् विहितोऽस्ति'। इति। अर्थात् विदुषा मन्त्रपाठः करणीयः, अज्ञानिनः मन्त्रपाठस्य वाचनं शास्त्रविरुद्धमस्ति। यदि स्त्रियः मन्त्रपाठस्य विधानमस्ति चेत् अनेनैव ज्ञायते यत् स्त्रियः अपि वेदाध्ययनम् आवश्यकम् इति।
अत्रेदं ध्येयं यत् न केवलं स्त्रियाः वेदाध्ययनाधिकारः वर्तते अपितु अनेकेषां मन्त्राणां मन्त्रद्रष्ट्र्यः ऋषिकाः अपि सन्ति। ४२२ वेदमन्त्राणां द्रष्ट्र्यः ऋषिकाः सन्ति इति कपिलदेवद्विवेदीमहाभागः 'वेदों में नारी' इति नामके पुस्तके उल्लिखितवान्। ऋषिकासु प्रसिद्धाः ऋषिकाः सन्ति- वाग् आम्भृणी, लोपामुद्रा, शची, काक्षीवती, उर्वशी, इन्द्राणी, श्रद्धा, कामायनी, अदिति, घोषा, सुर्या, सावित्री, अपाला, विश्ववारा, आत्रेयी।
युद्धविद्यासु यानादीनां चालनेऽपि स्त्री सुशिक्षिता भवेदिति वेदे उच्यते-

'आ जंघन्ति सान्वेषां जघनाँऽउप जिघ्नते।
अश्वाजनि प्रचेतसोऽश्वान्त्स्मत्सु चोदय'[17]॥

अत्र महर्षिदयानन्दः स्ववेदभाष्ये वदति-

'यथा राजा राजपुरुषाश्च यानाश्वचालनयुद्धव्यवहारान् जानीयुस्तथा तत्स्त्रियोऽपि विजानन्तु'[18] इति।

अनेन ज्ञायते यत् वेदे स्त्रियाः समानत्वं केवलं वेदाध्ययनमात्रे एव न प्रदर्शितम् अपितु अन्यत्रापि स्त्रियाः समानत्वं स्वीक्रियते। स्त्रियः राज्यपालनमपि कर्तुं शक्नुवन्ति। यतो हि स्त्रीणां विद्याधिकारे समानाधिकारः, अधिकारेषु समानाधिकारः, शौर्ये समानाधिकारः यदा वर्तते तदा राज्यपालनेऽपि ताः समर्थाः एव भवन्ति।

**सन्दर्भ सूची**

1. अथर्ववेदः- ११,५,१८
2. ऋग्वेदः- १०,१५९,२
3. अथर्ववेदः-
4. ऋग्वेदः- १०,८५,४६
5. ऋग्वेदः- ३,५३,४
6. अथर्ववेदः- २०,१२६,१०
7. यजुर्वेदः- १३,१७
8. महर्षिदयानन्दकृतयजुर्वेदभाष्यम्- १३,१७
9. निर्णयसिन्धुः, तृतीयपरिच्छेदः
10. ऋग्वेदः- १०,१०९,४
11. यजुर्वेदः- १३,२६
12. ऋग्वेदः- १०,१५९,५
13. यजुर्वेदः- १०,२७
14. महर्षिदयानन्दकृतयजुर्वेदभाष्यम्- १०,२७
15. आश्वलायनश्रौतसूत्राणि- १,११
16. तैत्तिरीयब्राह्मणम्- १,६,५,६
17. यजुर्वेदः- २९,५०
18. महर्षिदयानन्दकृतयजुर्वेदभाष्यम्- २९,५०